# Guru Stotram

# गुरुस्तोत्रम् ७

## Document Information

Text title : Guru Stotram

File name : gurustotram7.itx

Category : deities_misc, bRRihannAradIyapurANa, gurudev, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : bRRihannAradIyapurANa | pUrvabhAga | adhyAya 89/4-8||

Latest update : October 22, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 22, 2024

*sanskritdocuments.org*

# गुरुस्तोत्रम् ७

सनत्कुमार उवाच ।
अथासामावृतिस्थानां शक्तीनां समयेन च ।
नाम्नां सहस्रं वक्ष्यामि गुरुध्यानपुरःसरम् ॥ ८९-१॥

नाथा नव प्रकाशाद्याः सुभगान्ताः प्रकीर्तिताः ।
भूम्यादीनि शिवान्तानि विद्धि तत्त्वानि नारद ॥ ८९-२॥

गुरुजन्मादिपर्वाणि दर्शान्तानि च सप्त वै ।
एतानि प्राङ्मनोवृत्त्या चिन्तयेत्साधकोत्तमः ॥ ८९-३॥

गुरुस्तोत्रं जपेच्चापि तद्गतेनान्तरात्मना ।
नमस्ते नाथ भगवञ्शिवाय गुरुरूपिणे ॥ ८९-४॥

विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह ।
नवाय नवरूपाय परमार्थैकरूपिणे ॥ ८९-५॥

सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते ।
स्वतन्त्राय दयाक्लृप्तविग्रहाय शिवात्मने ॥ ८९-६॥

परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ।
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ॥ ८९-७॥

प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ।
पुरस्तात्पार्श्वयोः पृष्ठे नमः कुर्यामुपर्यधः ॥ ८९-८॥

सदा मच्चित्तसदने विधेहि भवदासनम् ।
इति स्तुत्वा गुरुं भक्त्या परां देवीं विचिन्तयेत् ॥ ८९-९॥

इति नारदपुराणे पूर्वभागे एकोननवतिमाध्यायान्तर्गतं
गुरुस्तोत्रं समाप्तम् ।
(एवं च तन्त्रराजतः प्रथमपटले ९६-१००)

बृहन्नारदीयपुराण । पूर्वभाग । अध्याय ८९/४-८॥

bRRihannAradIyapurANa . pUrvabhAga . adhyAya 89/4-8..

Proofread by PSA Easwaran

*Guru Stotram*

pdf was typeset on October 22, 2024

Please send corrections to *sanskrit@cheerful.com*